MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

मानवशरीरे आमदोषस्य प्रभावः

Sunita Behera
Research Scholar,
Dept. of Sanskrit
Pondicherry University

संक्षिप्तसारः

आयुर्वेदसाहित्ये स्वास्थ्यस्य मूलाधारः खलु अग्निः इति मन्यते। साधारणतः अग्निविषये विभिन्ना धारणा दृश्यते। यथा- भूतविशेषः, देवविशेषः, तेजोविशेषः चेति श्रौतप्रतिपाद्यरूपेण अग्नेः परिकल्पना अवलोक्यते समाजे। 'अग्निः' इति शब्दस्य अर्थः न केवलं भौतिकाग्निः, अपितु शरीरस्य जैविक-ऊर्जा वर्धयति, भोजनं पाचयति, पोषकतत्त्वं च अवशोष्यति। मानवशरीरे अग्नेः महत्वम् अनस्वीकार्यम्। सन्तुलिताग्निः स्वस्थजीवनस्य वीजो भवति। आयुर्वेदवाङ्मये अग्नेः संख्या बहवः मन्यते। यतोहि अस्य शरीरस्य प्रत्येकं परमाणोः मध्ये विद्यमानोऽस्ति अग्निः। अस्य कार्यस्य आधारहेतोः अग्निः तु त्रिविधः। यथा- जठराग्निः, भूताग्निः, धात्वाग्निः चेति। एते मिलित्वा शरीरस्य सन्तुलनहेतु कार्यं कुर्वन्ति। यथा- जठराग्नेः सन्तुलनं मनुवजीवने महत्वपूर्णमस्ति। अस्य अग्नेः सन्तुलनस्य कारणात् शरीरं सदा सुस्थं, ऊर्जावान्, रोगमुक्तं च भवति। अग्निरयं समरूपेण यदा कार्यं कुर्वति तदा जीवनप्रक्रिया सुष्ठं भवति, न चेत् शरीरे नैकदोषदूषितं सम्भवति।

असन्तुलिताग्निः 'आमः'(toxins) रूपेण परिवर्तनं भवति। यस्मात् कारणात् बहु रोगाः उपजायन्ते। यथा – अजीर्णः, वातविकारः, स्थौल्यता, विबन्धः, चर्मरोगः, सन्धिशूलः चेति। एतेषां रोगाणां निवारणाय सन्तुलितमाहारं, नियमित दिनचर्याः, योग-प्राणायां चेति अनिवार्यमस्ति। एतस्मात् कारणात् अयुर्वेदशास्त्रे बहु नियमाः दृश्यन्ते। अस्य शोधपत्रस्य माध्यमेन शास्त्रसम्मतम् उपदेशादि प्रस्तोतुं कामयते मे मनः।

कूटशब्दाः – अग्निः, आमः, आयुर्वेदः, जठराग्निः

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

प्रस्तावना

भारतीयज्ञानपरम्परायां प्रचीनतमः वैज्ञानिकग्रन्थः आयुर्वेदः। आयुर्वेदविज्ञाने आदिदैविकः, आदिभौतिकः, आध्यात्मिकः चेति दुःखस्य निवारणं कर्तुं सामर्थं वर्तते। आयुर्वेदसाहित्यं न केवलं स्वतन्त्रस्थानं प्राप्नोति संस्कृतसाहित्ये, अपितु चिकित्साशास्त्रे तस्य स्थानम् अनस्वीकार्यमस्ति। आयुर्वेदे दोषत्रयं वर्णनमस्ति, यथा - वातपित्तकफश्चेति। एतस्य मध्ये 'पित्तं' हि अग्निः इति स्वीक्रियते। आयुर्वेदे कथ्यते पित्तदोषः मुख्यरूपेण अग्निरापमहाभूतेभ्यां निर्मितो अभवत्।

सम्प्रति अग्निविषये विभिन्ना धारणा दृश्यते लोके। यथा- भूतविशिष्टः, देवविशिष्टः, तेजोविशिष्टः चेति। परन्तु आयुर्वेदे अग्निः स्वतन्त्ररूपेण प्रकाशयति। शरीरस्य सन्तुलनं, चयापचयं चेति स्वास्थ्यस्य सम्यक् रूपेण कार्यक्षेत्रे 'अग्निः' खलु मुख्यस्थानमस्ति। अतः आचार्य चरकेनो उक्तम् - "**अग्निर्हि स्वस्थस्य मूलं, सर्वेषां रोगाणां चाधिष्ठानम्**"[i] अर्थात् अग्निः हि सर्वस्य शरीरस्य मूलं तथा सर्वेषां रोगाणां अधिष्ठानं भवति। अस्य परमाणोः मध्ये विद्यते अयमग्निः। यतोहि प्रत्येकं जैविकप्रक्रिया अग्निना सम्भवति। मानवस्य कोशिका निर्माणं, विघटनं च अग्नेः कारणात् सिध्यति।

मुख्यतः अग्निः खलु त्रयोदश भेदाः सन्ति। यथा - जठराग्निः, पञ्चभूताग्निः, सप्तधात्वाग्निश्चेति। जठराग्निः तु चतुर्विधः, यथा - बिषमाग्निः, तीक्ष्णाग्निः, मन्दाग्निः, समाग्निश्चेति।

विषमाग्निः – विषमाग्निः न तु ऊष्मा वर्तते। अतः अन्नं शीघ्रं न पच्यते। सर्वदा मन्दं मन्दं पच्यते। विषमाग्नेः प्रभावेण शरीरस्य आलस्यता, नेत्रकूटं, मुखदुर्गन्धं चेति भवति।

तीक्षाग्निः – अयमग्निः पित्तस्य मध्ये तीक्ष्णं भवति। तिव्रगतेः कारणात् शरीरे पाचनक्रियास्सम्पन्नं करोति। अतो मानवशरीरं सदैव भोजनं कर्तुमिच्छति।

मन्दाग्निः – कफपीडितशरीरे पाचनक्रियायाः समस्या जनयति। तेन पाचनप्रक्रिया शनैः शनैः प्रवर्तते। अतः क्षुत्सम्भावना यदि नियतरूपेण न भवति तर्हि नियताहारस्य सम्भावना न भवति। ततः शरीरं स्वस्थं न तिष्ठति।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

समाग्निः – यत्र वातपित्तकफादिः समरूपेण तिष्ठति तत्र पाचकप्रक्रियापि समरूपेण तिष्ठति। अत्र हेतुभूतोऽग्निः समाग्निरिति कीर्त्यते।

पञ्चभूताग्निः – पञ्चभूतेभ्यो निर्मितोऽग्निः पाञ्चभौतिकोऽग्निः इति उच्यते। अस्माकं शरीरं पञ्चभूतेभ्यो निर्मितो भवति। आयुर्वेदे आचार्याणां मन्यन्ते यत् समगुणयुक्तभोजनं समगुणयुक्ततत्वं च पोषणं करोति। पार्थिवाग्निः, आप्याग्निः, तैजसाग्नि, वायवाग्निः, नाभाग्नि चेति पञ्चभूताग्नयस्सन्ति।

सप्तधात्वाग्निः –

इदं शरीरं सप्तधातुभिर्निर्मितो भवति। भोजनस्य अनन्तं रसः उत्पन्नं जायते मनुष्याणां देहे। रसोऽयं धात्वाग्निरूपेण शरीरस्य वर्धनं करोति। अतो मानवशरीरे अनपेक्षितवस्तु मलमूत्रादिद्वारा निष्कासितं भवति। अयं धात्वाग्निः सूक्ष्मपचनं इतिनाम्ना व्यवह्रयते। सप्तधात्वाग्निः यथा – रसधात्वाग्निः, रक्तधात्वाग्निः, मांसधात्वाग्नि, मेदधात्वाग्निः, अस्तिधात्वाग्निः, मज्जाधात्वाग्निः, शुक्रधात्वाग्निः चेति। एषामग्निनां सन्तुलनेन शरीरं स्वस्थं भवति। अतः स्वुस्थशरीरस्य परिभाषा उल्लिखितम् सुश्रुतसंहितायाम्। यथा –

" समदोषः समाग्निश्च समधातुमलक्रियः।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते" ॥[ii]

शरीरे आम-अग्नेः सम्बन्धम् –

जैविकाग्निः शरीरे आयुः, बलं, वर्णं, रोगप्रतिरोधकशक्तिं च वर्धयति। यदि शरीरस्य अग्निकार्ये बाधा आयाति तर्हि आमस्य निर्माणं भवति। यस्मात् कारणात् रोगः उत्पन्नं भवति। स्रोतसङ्गः स्रोतप्रलेपः वा प्रकियायाः माध्यमेन आमः निर्मियते। सूक्ष्मपोषकतत्त्वं(micronutrients) शरीरस्य धातूनां पर्यन्तं गन्तुं न शक्नोति अतः शरीरे रोगः, क्षीणता च आयाति। सर्वेषां जीवितप्रणीनां मूलाधारो भवति अग्निः। यथा अष्टाङ्गहृदये आमस्योपरि वर्णितम् –

"उष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम्।
दुष्टमामाशयगतं रसमामं प्रचक्षते॥"[iii]

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

अर्थात् यदा शरीरे जठराग्नेः पाचनशक्तिं क्षीणं भवति, तदा आहारं सम्यक् रूपेण न पच्यते। तस्मात् आमदोषः सञ्जातम्। अर्थात् असन्तुलिताग्नेः 'आमः' (toxins) उत्पद्यते। आमदोषः शरीरस्य यस्मिन् भागे वसति तस्मिन् भागे शरीरस्य दोषं व्याप्यते। तथा आमलक्षणयुक्तो विविधाः विकाराः उत्पिडितं करोति। यथा उल्लिखितम् –

"यत्रस्थमामं विरुजेत्तमेव देशं विशेषेण विकारजातैः।
दोषेण येनावततं शरीरं तल्लक्षणैरामसमुद्भवैश्च"॥[iv]

चिकित्साशास्त्रानुसारं 'आमः' अर्थात् अपरिपक्वतत्त्वमस्ति। आयुर्वेदे आचार्याः मन्यन्ते यत् अग्निचिकित्सा हि वस्तुतः कायचिकित्सा अस्ति। अत्र 'कायः' इति शब्दस्यार्थं कायाग्निः। कायाग्नेः अवरुद्धकारणात् शरीरे 'आमदोषः' सृष्टिं भवति। आमशरीरस्य हेतोः अहितकरं भवति। यस्मात् कारणात् बहु रोगाः उपजायन्ते। यथा - अजीर्णः, गुरुत्वं, ज्वरः, शूलः, वातविकारः, स्थौल्यता, विबन्धः, चर्मरोगः, सन्धिशूलः चेति।

जठराग्नेः कारणात् आमस्य भेदाः –

आमरुत्पन्नस्य पूर्वं आमस्य विभिन्नाः अवस्थाः विषये ज्ञानं महत्वपूर्णमस्ति। मुख्यरूपेण चत्वारः दशाः वर्तन्ते। यथा – अन्नरसरूपमामः, आद्याहाररूपमामः, रसशेषरूपमामः, मलसञ्चयरूपमामः चेति

अन्नरसरूपमामः – यदि अग्निना अन्नं न पच्यते तर्हि अपक्वं भोजनं किण्वनप्रकियायां (fermentation process)शरीरे गच्छति, एवं विषवत् कार्यं करोति। अतः फलस्वरूपम् अन्नरसं शरीरात् बहिः गच्छति। यदा अन्नरसः बहिर्निर्गतो भवति तदा महास्रोतसि रोगम् उत्पद्यते। अयमामः मूख्यतः जलस्य कारणात् भवति।

आद्याहारधातुरूपमामः – यदा आहारं सम्पूर्णतया न पचति तदा शरीरात् रसधातुम् अवशोषति, तत्तु आद्याहरधातुरूपमामः इति कथ्यते। अनेन रसाग्निना पच्यते, यदि न पच्यते तर्हि मन्दाग्निदोषस्य कारणं भवति।

रसशेषरूपमामः – अत्र अत्यधिकाहारः ग्रहणात् अग्नेः कार्यं मन्दं भवति। मन्दाग्निः पाचनं क्रियां सम्पूर्णं न भवति। अतः अपक्वावशेषांशः रसशेषरूपमामः इत्युच्यते।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

मलसञ्चयरूपमामः – आहारात् प्रसादकिट्टश्च विभाजनं करोति जठराग्निः। अग्नेः मन्थरहेतोः मलमूत्रादि निर्माणं न सम्भवति। अस्मात् कारणात् अन्नरसरूपमामः, आद्याहारधातुरूपमामः च कारणं भविष्यति। यदि शरीरात् मलं निष्कासितो न भवति तर्हि स्वास्थ्यमसन्तुलितो भविष्यति। बहु रोगाः द्रक्ष्यन्ति।

आमदोषस्य प्रभावः –

शरीरे वातपित्तकफश्चेति दोषत्रयमस्ति। अपचितं भोजनं यदा शरीरस्य दूषितं करोति, तदा आमदोषः इति कथ्यते। आमदोषात् आमवातः भवति। माधवनिधाने आमवातविषये उल्लिखतम्। यथा–

"विरुद्धाहारचेष्टस्य मन्दाग्नेर्निश्चलस्य च। स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्वतस्तथा॥
वायुना प्रेरितो ह्यामः श्लेष्मस्थानं प्रधावति। तेनात्यर्थं विदग्धोऽसौ धमनीः प्रतिपद्यते॥
वातपित्तकफैर्भूयो दूषितः सोऽन्नजो रसः। स्रोतांस्यभिष्यन्दयति नानावर्णोऽतिपिच्छिलः॥
जनयत्याशु दौर्बल्यं गौरवं हृदयस्य च। व्याधीनामाश्रयो ह्येष आमसंज्ञोऽतिदारुणः॥
युगपत्कुपितावन्तस्त्रिकसन्धिप्रवेशकौ। स्तब्धं च कुरुतो गात्रमामवातः स उच्यते"॥[v]

यथा –

१. आमदोषस्य हेतोः स्त्रीशरीरे बहु समस्याः आयाति। यथा - मासिकधर्मे, प्रजननक्षमतायां, मानसिकस्वास्थे चेति। अनियमितमासिकधर्मः, रक्तहीनता, कष्टार्तवं चेति कारणं भवति मन्दजठराग्निः। एतस्मात् कारणात् शरीरं प्रतिदिनं क्षीणं भवति। तथैव तीक्ष्णजठराग्नेः सक्रियकारणवशतः अत्यधिकं रक्तस्रावः, पीतातवः चेति भवति।

२. सुस्थप्रजनस्य हेतोः अग्नेः सन्तुलनम् अत्यावश्यकम्। आमस्य वृद्धिः निमित्तं सन्तानोत्पत्तिं, बीजदोषः, स्तनपीडा चेति समस्या आयाति।

३. सम्प्रति आमस्य प्रभावेण स्त्रीस्वास्थे PCOD, PCOS, रक्तहिनता, कर्कटरोगः, चर्मरोगं चेति दरीदृश्यते।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

४. अग्निः सत्त्वरजस्तमोगुणेभ्योः प्रभावितो भवति। आमस्य कारणात् मानसिकः असन्तुलता, भावनात्मक संयमता चेति प्रभावितो भवति। विषमाग्नेः अन्तःस्त्रावः(hormone) असन्तुलितो अभवत्। यस्मात् कारणात् अत्यधिकक्रोधं, चिन्ता, मानसिकविकारः चेति आयाति।

५. सामदोषामदोषश्चेति रोगद्वयम् आमस्य कारणात् उत्पन्नं भवति। आमदोषः रसादिसप्तधातोः दूषितं करोति। आमदोषात् वातदोषः उत्पन्नं जायते। पुनः आमदोषात् उद्भवो ज्वरादिरोगाः सामदोषः इति कथ्यते। यथा – आमज्वरः, आमातिसारः चेति। यथा उल्लिखितम् अष्टाङ्गहृदये –

"आमेन तेन सम्पृक्ता दोषा दूष्याश्च दूषिताः।
सामा इत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः"॥[vi]

आमस्य गुणलक्षणं च –

शास्त्रीयग्रन्थे आमस्य गुणाः स्वतन्त्ररूपेण स्वीक्रियन्ते। उपयुक्त आमदोषस्य गुणं वर्गिकरणमस्ति। यथा – द्रवत्वं, पिच्छिलत्वं, स्निग्धता एते गुणाः स्पर्शेन अनुभूयन्ते। तथैव तन्तुमयत्वं, अविपक्वता, असंयुक्तता, अनेकवर्णयुक्ता, पिच्छिलता इमे गुणाः चक्षुषा द्रष्टुं शक्यते। गन्धेन ज्ञातुं शक्नोति यथा मुखदुर्गन्धम् । तथा गुरुता अविपक्वता चेति गुणाः प्रश्नेन ज्ञायते। तथैव आमदोषस्य लक्षणानि यथा –

"अङ्गमर्दोऽरुचिस्तृष्णा ह्यालस्यं गौरवं ज्वरः।
अपाकः शूनताऽङ्गानामामवातस्य लक्षणम्"॥[vii]

विभिन्नाङ्गेषु पीडा, अरुचिः, अलसः, गुरुता, ज्वरः, भोजनस्य अपक्वता, शरीरवेदना, समाजिह्वा चेति आमवातस्य सामान्य लक्षणानि ।

आमदोषस्य निवारणम् –

आयुर्वेदानुसारं आमदोषस्य निवारणं मुख्यतः अग्निदीपनं, आमपाचनं, शोधनं चेति माध्यमेन भविष्यति। अग्निदीपनम् अर्थात् पाचनशक्त्यां वृद्धिः इत्यर्थ। अतः अद्रकं, पिप्पली, मरिचं, त्रिकटुचुर्णं, उष्मजलपानं चेति हितकरं भवति।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

यस्मात् जठराग्निः यथोचितं कार्यं करोति। तथैव आमपाचनं हेतु पञ्चकोलचूर्णं, अमृता(गुडूची), त्रिफला, हिङ्गुः, अग्निवर्धनं (यवनिका) इत्यादि स्वीकरणीयम्। शरीरस्य शुद्धिकरणात् लघु-आहारः, उष्णभोजनं, सद्याहारं च ग्रहीतव्यम्। प्रधानतः नियमितव्यायामं, स्वेदनं, पर्याप्तनिद्रा, दिनचर्या, ऋत्वनुसारमाहारं च अवश्यमेव पालनीयम्।

मानवशरीरे अग्नेर्महत्त्वम् -

मानवशरीरे विद्यमानः अग्नेर्महत्त्वमतुलनीयम्। अग्निः मानवस्य जीवनधारायाः पोषणं शक्तिं च प्रददाति। तेन रोगप्रतिरोधस्य क्षमतां बर्धयति। मानवशरीरस्य सर्वाङ्गेषु स्थित्वा अग्निरयं समग्रशरीरस्य समृद्धिं सम्पादयति। अग्निरयं समरूपेण यावत् पर्यन्तं तिष्ठति शरीरे, तावत् पर्यन्तं जीवनप्रक्रिया सन्तुलितं भवेत्, न चेत् नैकदोषेण दूषितो भवति। अतः आयुर्वेदे उल्लिखितमस्ति – "**अग्निसमावस्था हि आरोग्यं। अग्निवैषम्यं रोगहेतुः॥**"[viii] इति।

निगमनम् –

कालिदासेन उल्लिखितम् स्वास्थं हि कर्तव्यसाधनस्य प्रथमं सोपानं भवति। **"शरीरमाद्यं खलु धर्मसाधनम्।"**[ix] विना आहारं मानवः सक्रियो न भवितुमर्हति। उपयुक्ताहारविहारादिनैव जीवनं सुस्थं न भवति। पाचकप्रक्रिया शरीरस्य मूलम्। सा प्रक्रिया पाचकाग्निं विना न सम्भवति। पाचकाग्नेः प्रभावेण मानवशरीरस्य सर्वाङ्गीणविकासो भवति। अभोजनम्, अजीर्णवस्तुभोजनम्, अतिभोजनं, विषमभोजनम्, इत्येतत् सर्वं पाचनप्रक्रियां विघटयति तथा आमदोषस्य उत्पन्नं करोति। तेन मानवस्य मध्ये रोगः दृश्यते। अर्थात् शास्त्रानुसारं भोजनं प्रयोजनम्। वातपित्तकफश्चेति सम्यक् ज्ञानं सम्पादयति। तदनुसारं स्वप्रवृत्तिं पालयेत्। आवश्यकतानुसारम् उपचारसेवनं भवेत्। अतः सम्यक् जीवनयात्रासम्पादनाय शरीरद्वारा दोषाणां ज्ञानम् अग्नितत्त्वानुसन्धानम् अत्यावश्यकं भवति। येन चित्तनिरोधादिद्वारा ध्यानादिपरम्परया मोक्षलाभस्य अवसरो भवति। तदुक्तम् –

"आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ।
ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षाः"॥[x]

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

Endnotes

I. चरकसंहिता, चिकित्सा.स्थान १५.४२-४३
II. सुश्रुत संहिता, सूत्रस्थान १५.४८
III. अष्टाङ्गहृदयम्, सूत्रस्थानम् १३.२६
IV. सुश्रुत संहिता, उ.तं, अ.५६, श्लोक सं.२२
V. माधवनिदानम् २५.१-५
VI. अष्टाङ्गहृदयम्, सूत्रस्थानम् १३.२७
VII. माधवनिदानम्, अ.२५.६
VIII. चरकसंहिता.सूत्रस्थान,१२.६
IX. कुमारसंभवम् ५.३३
X. छान्दोग्योपनिषद् ७.२६.२

Bibliography

- Kashinat, E. (2020). *Astangahridaym of Vagbhata vol 1.* Varanasi: Chowkhamba krishnadas academy.
- Satyanarayan, E. (1984). *Charak Samhita of agnibesh vol 1.* Varanasi: Chaukhamba Publication .
- आम्बिकादत्तशास्त्री, स. (१९८९). *सुश्रुतसंहिता सप्तमसंस्करणम्.* वाराणसी: चौखम्भा- संस्कृत- संस्थानं.
- चक्रपाणिदत्तः, ट. (२०११). *चरकसंहिता प्रथमसंस्करणम्.* वाराणसी: चौखम्भा-ओरियन्टाल्.
- त्रिपाठी, स. ब. (२०१४). *अष्टाङ्गहृदयम्.* दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान.
- दत्तः, ह. (१९७७). *देहधात्वाग्निविज्ञानम् प्रथमसंस्करणम्.* दिल्ली: मोतिलाल-बनारसीदासः.
- शुदर्शनशास्त्रि, ट. (१९७६-७७). *माधवनिदानम् षष्ठसंस्करणम् .* वाराणसी: चौखम्भा संस्कृत संस्थान.